# Chandrodayah

## ચન્દ્રોદયઃ

## Document Information

```
Text title : Chandrodayah 1
File name : chandrodayaH.itx
Category : misc, sanskritgeet
Location : doc_z_misc_general
Author : vijayan vi. paTTAmbI
Acknowledge-Permission: Vijayan V. Pattambi
Latest update : August 11, 2024
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

# ચન્દ્રોદયઃ

ઉદેતિ ચન્દ્રમા દૂરે વનચ્છન્નનભસ્થલે
રાત્રિર્હસતિ સામોદં શુભ્રકાન્તમુખામ્બુજા ।
આકાશં શોભતે સમ્યગ્ નક્ષત્રૈઃ રુચિરપ્રભૈઃ ।
ઉત્પ્લુત્યોત્પ્લુત્ય ગચ્છન્તી ચન્દ્રમેયં પતેદ્ભુવિ
બાલકૈર્વર્ધિતોત્સાહૈઃ વીક્ષ્યમાણૈઃ સકૌતુકમ્ ।
લીયન્તે ચન્દ્રકાન્તાસ્તુ કુમુદાનિ હસન્તિ ચ
યુવકાઃ ઉત્કણ્ઠિતાસ્સર્વે કામિનીવિરહશોષિતાઃ। ।
ઉલૂકાશ્ચક્રવાકાશ્ચ સમં સ્વપ્રણયિનીજનૈઃ
સ્વૈરં કુર્વન્તિ સઞ્ચારં વૃક્ષાત્ વૃક્ષં વનાદ્વનમ્ ।
બાલકાઃ વર્ધિતામોદાઃ અઙ્ગણેષુ સ્થિતાઃ ચિરમ્
ઉન્મુખૈઃ સ્ફારિતૈર્નેત્રૈઃ ઈક્ષન્તે ચન્દ્રમાં ભૃશમ્ ।
પશ્ય પશ્યાઙ્ગ! હે પશ્ય કોસ્યં હસતિ દિઙ્મુખે
વારં વારં વદન્ત્યેવં માતા ભોજયતિ શિશુમ્ ।
દદતી સર્વસૌભાગ્યં શીતઞ્ચામૃતસન્નિભમ્
સૌખ્યઞ્ચ ચિત્તસમ્પૂર્ણં સમેષાં નેત્રધારિણામ્ ।

— વિજયન્ વિ. પટ્ટામ્બી

*Chandrodayah*
pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*